**PAPER - 5**

# MT

**2017 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER -V**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

## ✶ प्रथमः विभागः - गद्यम् ।

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

स्वामी पलायितुमारभत यतः .................

(कठिनोऽयं प्रसङ्गः इति सः अमन्यत । / व्यायामः आवश्यकः इति सः अमन्यत ।)

II) कः कं वदति । १

तेन ते वानराः भीताः ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

वाराणस्यां स्वामी गणेशमन्दिरं गतवान् ।

भारतभ्रमणसमये एकदा स्वामी विवेकानन्दमहोदयः वाराणसीं प्राप । तत्र अन्नपूर्णायाः मन्दिरं गत्वा प्रणम्य च स तां स्मरन् निवर्तमानः मार्गे किमपि विस्मयजनकमन्वभवत् । मार्गस्य एकतः आसीत् कश्चन तडागः अपरतः च उन्नता भित्तिका । तेन मार्गेण गच्छता स्वामिना ज्ञातं यत् केचन वानराः तस्य पृष्ठतः अनुगच्छन्तीति । यदा स्वामी तिष्ठति तदा तेऽपि वानराः तिष्ठन्ति यदा स चलति तदा वानराः तमनुगच्छन्तीति ज्ञातं स्वामिना । तान् मार्गाद् दूरीकर्तुं स्वामिना पदप्रहारस्याभिनयः कृतः तदा ते तं दंष्टुमधावन् । कठिनोऽयं प्रसङ्गः इति मत्वा भीतः सः त्वरया पलायितुमारभत । वानरा अपि तम् अन्वधावन् । संभ्रान्तं स्वामिनं पलायमानं दृष्ट्वा मार्गे आसीनः कोऽपि याचकः उच्चैरभाषत, ''अरे संन्यासिन्, अलं पलायनेन । निर्भयतया तान् वानरान् अभिमुखो भव । तेन ते वानराः भीताः न त्वां पीडयिष्यन्ति ।'' तदाकर्ण्य निश्चयं कृत्वा स्वामी निश्चलः अभिमुखः जातः तेन ते भीताः वानराः दूरं पलायिताः । अथ गच्छता कालेन न्यूयॉर्कनगर्याम् एकस्यां सभायां भाषमाणेन स्वामिना कथितोऽयं प्रसङ्गः । सोऽवदत्, ''प्रसङ्गेनानेन अवगतः मया महान् सिद्धान्तः यद् मा भैषीः आपदः । आपदाभिमुखाः भवत । तस्याः प्रतिकारं कुरुत ।''

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) तदाकर्ण्य - ...... + ..... । (तत् + आकर्ण्य / तदा + कर्ण्य / तद + आकर्ण्य)

ii) अनुगच्छन्तीति - ...... + ..... ।

(अनुगच्छन् + तीति /अनुगच्छन्ती + ति / अनुगच्छन्ति + इति)

II) समुहेतरपदं चिनुत । १

i) सरः, तडागः, उद्यानम्, जलाशयः - ....... ।

ii) वानराः, कवयः, मर्कटाः, कपयः - ....... ।

III) गद्यांशतः योग्यं विशेषणं चिनुत । १

i) ....... वानराः । ....... भित्तिका ।

IV) गद्यांशात् सप्तमन्त्यपदे चित्वा लिखत । १

३. **स्वमतप्रकटनम् ।** २

'मानवः पलायनं त्यक्त्वा आपदाभिमुखः भवतु' एतस्य विषये स्वमतं माध्यमभाषया लिखत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

कलाकृतिः रसिकान् आनन्दयति यतः ..............

(सा भावयुक्ता रसयुक्ता च अस्ति । / सा रसहीना अस्ति ।)

II) कः कं वदति । १

नाट्येषु रसाभिव्यक्तिः कथं संभवति ?

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

अदित्या मादामकामामहोदया अभिनेतव्या ।

| | |
|---|---|
| अदितिः - | आचार्ये नमो नमः । नाट्यविषयिणी जिज्ञासा भवत्याः दर्शनार्थं मां प्रेरयति । |
| आचार्या - | किं कारणं ते जिज्ञासायाः? |
| अदितिः - | अस्माकं शालया राज्यनाट्यस्पर्धायाः कृते संस्कृतनाट्यस्य प्रयोगः करणीयः इति सुनिश्चितम् । झाशीराज्ञी मया अभिनेतव्या लक्ष्मीबाई । वीररसप्रधानमेतन्नाटकमिति दिग्दर्शकेन कथितम् । भरतमुनिविरचितं नाट्यशास्त्रं नाट्यरसान् च भवती जानाति । अतः तद्विषये प्रष्टुमहमागता । |
| आचार्या - | श्रृणु । प्रायः ख्रिस्तपूर्वं तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम् । एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः । तस्मिन् ग्रन्थे नाट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति । |
| अदितिः - | के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ? |
| आचार्या - | भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति । तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः । |
| अदितिः - | कति रसाः ? कानि च तेषां नामानि ? |

आचार्या - शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः । अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।

अदितिः - आचार्ये ! अधुना विशेषेण वीररसविषये कथयतु भवती ।

आचार्या - आम् । उत्साहः वीररसस्य प्रधानगुणः । स इतरानपि उत्साहयति । अन्यः गुणः अध्यवसायः नाम दृढनिश्चयः दृढयत्नश्च । अपरः गुणः निश्चला बुद्धिः। स्थैर्यधैर्यवीर्यगर्वोत्साहपराक्रमादिप्रभावात्मकैरभिनयैः रसनिष्पत्तिः कर्तव्या । एष रसः रसिकान् प्रेरयति ।

अदितिः - आचार्ये एतत्सर्वं मनसि अवधार्यैवाभिनयं करिष्ये ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

विविधभावैर्युक्ता - ....... + ....... ।

II) समूहेतरपदं लिखत । १

i) पाठशाला, पाकशाला, महानसः, पाकगृहम् । - ....... ।

ii) साधुः, मुनिः, सज्जनः, ऋषिः । - ....... ।

III) विशेषण - विशेष्य - अन्वितिः । (चतुर्थपदं लिखत।) १

i) तृतीये : शतके :: पञ्चमः : ....... ।

ii) ख्याताः : नवरसाः :: व्याख्याताः : ....... ।

IV) गद्यांशात् चित्वा केऽपि द्वे धातुसाधित-अव्यये लिखत । १

**३. पृथक्करणम् ।** २




**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

ददातु मे नूतनचीवराणि, यतः .............

(अद्य मे जन्मदिवसः । / मम चीवराणि जीर्णानि ।)

II) कः कं वदति । १

तद् उपधानरूपेण गृह्णामि ।

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

भगवान् सुगतः नाम गौतमबुद्धः ।

अवन्तीनगराद् बहि रासीद् विशालं रमणीयं तपोवनम् । पत्रपुष्पफलच्छायायुतैः वृक्षैः विराजमानं, विविधपशुपक्षिभिः समाश्रितं, तपोधनानां निवासस्थानं खल्वेतत्तपोवनम् । तत्रासीदेकः विख्यातः बौद्धविहारः । भगवतः सुगतस्य बहवोऽनुयायिनः तत्रोषित्वा तथागतस्योपदेशमनुसरन्तः भिक्षुव्रतानां पालनं कुर्वन्ति स्म । भगवान् सुगत एवास्माकं पिता इत्येवं मन्यन्ते स्म ते भिक्षवः । अतः विविधसमस्यानां निराकरणार्थं ते स्वयं गौतमबुद्धं प्रति गच्छन्ति स्म । एकदा कोऽपि भिक्षुःभगवन्तं प्रति जगाम । तं प्रणम्य अधोमुखः सोऽतिष्ठत्। भगवता पृष्टः सः अकथयत्, ''मम चीवराणि जीर्णानि अतः प्रार्थये ददातु मे नूतनचीवराणि।'' ततः भगवता पृष्टं किं कृतं त्वया पुरातनचीवराणाम्? स प्रत्यवदत्, ''भगवन्, तत् चीवरं मया शयनीयरूपेणोपयोजितम्'' । भगवान् पप्रच्छ ''किं कृतं त्वया पुरातनशयनीयस्य।'' स उवाच अहं रात्रौ तद् उपधानरूपेण गृह्णामीति । तदाकर्ण्य कुतुहलेन भगवान् अवोचत्, ''वत्स ! कुत्रास्ति ते पुरातनमुपधानम् ।'' तदपि जीर्णं जातमतः मया तद् पादस्वच्छीकरणाय द्वारे पादपोशी इति स्थापितं तथा च पुरातनपादपोशिनः सूत्राणि दीपस्य कृते वर्तिरूपेण उपयुज्यन्ते मयेति प्रत्युवाच सः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) विग्रहं लिखत । १

i) तत्रोषित्वा - ...... + ...... ।

ii) बहिरासीत् - ...... + ...... ।

II) विलोमशब्दानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | पुरातनम् | जीर्णम् । |
| (2) | अधोमुखः | नूतनम् । |
| | | उन्नतमुखः । |

III) गद्यांशे आगते द्वे विशेषणे लिखत । १

i) तपोवनम् .........., .......... ।

IV) गद्यांशे आगते द्वितीयान्तशब्दौ लिखत ........ , ........ । १

३. **पृथक्करणम् ।** २

तपोवनम्

| | | |
|---|---|---|
| | | तपोधनानाम् |
| समाश्रितम् | .............. | .............. |

**★ द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

उचितं पर्यायं चित्वा स्तम्भं पूरयत ।

(आरम्भे क्षीणा, अन्ते क्षीणा, आरम्भे विशाला, अन्ते दृढा)

| आर्येषु मैत्री | अनार्येषु मैत्री |
|---|---|
| | |
| | |

अणुपूर्वं बृहत्पश्चाद् भवत्यार्येषु सङ्गतम् ।
विपरीतमनार्येषु यथेच्छसि तथा कुरु ॥१॥
वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ॥२॥
तस्मादभूत् केसरखानवीरः पुनस्तदीयो हसनक्षितीशः ।
तस्मादभूदेदलशाहभूपः पुत्रोऽभवत् तस्य मुबारखेन्द्रः ॥३॥

२. **माध्यमभाषया लिखत ।** २

द्वितीय तथा तृतीयश्लोकस्य आधारेण फारुकवंशं वर्णयत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **शब्दज्ञानम् ।**

I) चतुर्थपदं लिखत। १

i) अधर्मः : धर्मः :: रिपुः : ....... ।

ii) मित्रम् : सुहृद् :: कारुण्यम् : ....... ।

II) विशेषण-विशेष्य-अन्वितिः । १

......, ...... धर्मः ।

धर्मः सर्वसुखाकरो हितकरो धर्मं बुधाश्चिन्वते
धर्मेणैव समाप्यते शिवसुखं धर्माय तस्मै नमः ।
धर्मान्नास्त्यपरः सुहृद् भवभृतां धर्मस्य मूलं दया
धर्मे चित्तमहं दधे प्रतिदिनं हे धर्म मां पालय ।।१।।
धृतिः क्षमा दया शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ।।२।।

२. **अन्वयपूर्तिः ।** २

धृतिः, क्षमा, ......, शौचं, ......, अनिष्ठुरा ......, मित्राणाम् अनभिद्रोहः च एताः श्रियः ...... समिश्रः ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) तन्मूलं ........ नाम ।।

ii) गृह्णन्तु ........ सिन्धुः ।।

iii) परोऽपि ........ ०मौषधम्।।

**ड) वृत्तनाम चिनुत ।** १

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ।।

अस्य श्लोकस्य वृत्तनाम ......... इति । (उपेन्द्रवज्रा / गीतिः / इन्द्रवज्रा)

## ✶ तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

i) संस्कृतवाक् राष्ट्रभाषा भवतु इति सर्वेषां सांसदानाम् इच्छा ।

II) एकपदेन उत्तरं लिखत । १

भीममैत्रयोः संवादस्य वृत्तं कुत्र प्रकाशितम्?

नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ।।१।।
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ।।२।।
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ।।३।।
प्रत्युत्ततार मैत्रं गीर्वाणगिरैव भीमरायोऽपि ।
श्रुत्वा तत्संवादं सर्वेऽप्यासन् चकितचकिताः ।।४।।

वृत्तं तन्नैकेषु प्रकाशितं प्रमुखवृत्तपत्रेषु ।
पाठं पाठं सर्वे प्रभावितास्तस्य चातुर्यात् ॥५॥
प्रस्तावश्चर्चान्ते न पारितो नैकसांसदविरोधात् ।
तेनाभवन् विषण्णाः सर्वे ये संस्कृते रक्ताः ॥६॥
रात्रिंदिवं पठित्वा ग्रन्थान् नानाविधान् संहितार्थम् ।
विरचय्य नूतनविधीन् स्त्रीदलितान् समावेशयत्तस्याम् ॥७॥
अभ्यस्य नैकस्मृतीर् मनुभारद्वाजयाज्ञवल्क्याद्याः ।
चर्चित्वा विद्वद्भिः प्रारूपं रचितं भीमरायेण ॥८॥

२. **पृथक्करणम् ।** २

(भीमरायेण संस्कृतेन सम्भाषणम्, संस्कृतवाग्विषये समितिरचना, भीममैत्रसंवादः वृत्तपत्रेषु प्रसिद्धः, मैत्रः निजशङ्कां पृष्टवान्)

| | | | | | | |
|---|---|---|---|---|---|---|
| | → | | → | | → | |

**✶ चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

अस्ति हेमाङ्गदे देशे राजपुरं नाम नगरम्। तत्र जीवंधरो नाम कोऽपि दयाशीलो राजपुत्रोऽभवत्। एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः ...... सह जलक्रीडां कर्तुं नदीं गतः। तत्र आसन्नमरणः कोऽपि कुक्कुरः तस्य दृष्टिमागतः। केनापि ...... भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणं आक्रोशति स्म। भूतानुकम्पी राजकुमारः बहु दुःखितः। तत्समीपम् ...... करतलेन परामृशन् करुणस्वरेण कुमारः अभाषत, 'भद्र केन निर्दयेन नराधमेन मारितोऽसि। भवतु यथाशक्ति लघूकरोमि ते दुःखम्। इत्युक्त्वा कुक्कुरं समाश्वासयितुं भृशं ...... । हस्तेन जलमानीय तमपाययत्। तथा च सानुक्रोशं भगवन्तं ...... तत्कर्णे मूलमन्त्रमुपदिष्टवान्। तस्य मन्त्रसामर्थ्येन स सारमेयः शान्तः सद्गतिं च गतः। अहो भूतदया महानुभावस्य।अहो भूतदया महानुभावस्य।

(आगत्य, वयस्यैः, प्रायतत, निर्दयेन, प्रार्थ्य)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. जलमहिमा । २. व्यायामस्य महत्त्वम् । ३. गणतन्त्रदिवसः ।

**क) संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) Valour is the cause of fame.

ii) The trees grow on the mountain.

iii) At the beginning of drama the actor calls his wife.
iv) Her acting appears artificial.
v) Who told you this?
vi) We will sit in the shadow of the tree.
vii) Have you read that news?
viii) An elephant walks very slowly.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु रक्ष् (१ प.प.) २. धातु सम् + ऋ (१ प.प.)
३. धातु याच् (१ आ.प.) ४. धातु रुच् (१ आ.प.)

ii) अशुद्धिसंशोधनम्-अव्ययानि प्रयुज्य रचितेषु ४ वाक्येषु २वाक्ययोः अशुद्धिसंशोधनं कुरुत। २

१. शालायाः परितः क्रीडाङ्गणं वर्तते ।
२. गृहस्य बहिः कूपः वर्तते ।
३. अस्माकं सेना राष्ट्ररक्षणे अलम् ।
४. छात्रेभ्यः कृते व्यायामः आवश्यकः ।

**✶ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।**

**प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)**

**अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३
**तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।**

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| आप्(५प.प.) | ....... | आप्नोति | ....... | आप्नुयात् | ....... | ....... |
| कृ (८आ.प) | कुरुताम् | ....... | ....... | ....... | ....... | अकुरुत |

**ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| सप्तमी | ...... | ...... | मनस्सु |
| द्वितीया | ...... | ...... | अनुयायिनः |
| प्रथमा | अयम् | ...... | ...... |
| षष्ठी | भवत्याः | ...... | ...... |

**क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(स्मर्तव्यम्, उपयोजितम्, वसन्तः, कथितः, करणीयः, दृष्टवान्, कलहायमानाः, पूजितवती)

**ड) समासाः ।**

**विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।)** ३

| | अ | ब |
|---|---|---|
| i) | अन्यः देशः, तस्मात् । | इतरेतर द्वन्द्व समास |
| ii) | पशवः च पक्षिणः च, तैः । | उपपद तत्पुरुष समास |
| iii) | तपः एव धनं यस्य सः । | बहुव्रीहि समास |
| iv) | न आर्याः, तेषु । | तृतीया तत्पुरुष समास |
| v) | खं गच्छन्ति इति । | कर्मधारय समास |
| vi) | निवासाय इदम् । | नञ् तत्पुरुष समास |
| vii) | न विद्यते मूल्यं यस्य तत् । | चतुर्थी तत्पुरुष समास |
| viii) | वैविध्येन पूर्णम् । | नञ् बहुव्रीहि समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) श्रीएदलशाहराज्ञा मसीतिरियं निर्मिता । (प्रयोगपरिवर्तनं कुरुत।)

ii) समाप्तेऽध्ययने रॉथफिल्डमहोदयेन टागोरमहोदयेन सार्धं परिचयः कारितः। (सतिसप्तमीरचनां निष्कासयत।)

iii) विजयिनी विनयिनी भव । ('भवती' इति शब्दं योजयित्वा वाक्यं पुनर्लिखत ।)

vi) दशाननः स्वर्गं गच्छति । ('श्रीरामचन्द्रः') (प्रयोजकरचनां कुरुत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।)** ३

i) महानसे ....... रसाः सान्ति । (6)

ii) नवरात्रं नाम ....... रात्रीणां समाहारः । (9)

iii) श्रावणमासे ....... तिथौ कृष्णजन्म भवति । ($8^{th}$)

iv) सप्ताहस्य ....... अहं मन्दिरं गच्छामि । (thrice)

## ✶ षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

'अग्नेः पक्षा' नाम्नि आत्मचरित्रे भूतपूर्वः राष्ट्रपतिः भारतरत्न डॉ. कलममहोदयः लिखति, ''स एव फलदायी नायकः य सामर्थ्यवतां जनानां सङ्ग्रहणं कर्तुं शक्नोति। स निरन्तरं सङ्घटने नूतनं रक्तं युञ्जीत। समस्यानां समाधानकरणे तथा नूतनकल्पनानां क्रियान्वयने स प्रवीणः स्यात्। स्वस्य गणे उत्साहं पूरयितुं स समर्थः स्यात्। यत्र यावद् आवश्यकं तत्र तावच्छ्रेयः स इतरेभ्यः दद्यात्। सार्वजनिकतया तेषां प्रशंसा स कुर्यात् किन्तु दोषविमर्शनम् एकान्ते एव कुर्यात्।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

कस्यापि कोऽप्यतिशयोऽस्ति स तेन लोके
ख्यातिं प्रयाति न हि सर्वविदस्तु सर्वे।
किं केतकी फलति किं पनसः सुपुष्पः
किं नागवल्ल्यापि च पुष्पफलैरूपेता।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ४

कञ्चुकी – (सहसा प्रविश्य) इदं वासोयुगलम्।
नायकः – (दृष्ट्वा सहर्षमात्मगतम्) दिष्ट्या सिद्धमभिवाञ्छितमनेनातर्कितोपनतेन रक्तांशुकयुगलेन।
कञ्चुकी – देव्या, मित्रावसुजनन्या प्रेषितम्। तदेतत्परिधत्तां कुमारः।
नायकः – कञ्चुकिन् उपनय। (कञ्चुकी रक्तवसनद्वयमुपनयति। गृहीत्वा आत्मगतम्।) सफलीभूतो मे मलयवक्त्याः पाणिग्रहः। (परिक्रम्य प्रकाशम्) कञ्चुकिन् गम्यताम्। मद्वचनादभिनन्दनीया देवी।

**Best of Luck**